## इणो यण्। (८१/२४५८)

इणोऽङ्गस्य यणादेशो भवति अचि परतः[1]। यन्ति। यन्तु। आयन्। इयङादेशापवादोऽयम्। 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' (व्या. प. १०) इति गुणवृद्धिभ्यां परत्वादयं बाध्यते। अयनम्। आयकः॥

## एरनेकाचोऽसंयोगपूर्वस्य। (८२/२७२)

धातोः इति वर्तते, तेन संयोगो विशेष्यते। धातोरवयवः संयोगः पूर्वो यस्मादिवर्णान्न [2]भवति असावसंयोगपूर्वः, तदन्तस्या[3]ङ्गस्य अनेकाचोऽचि परतो यणादेशो भवति। निन्यतुः। निन्युः। उन्न्यौ। उन्न्यः। ग्रामण्यौ। ग्रामण्यः। एः इति किम्? असंयोगपूर्वग्रहणमिवर्णविशेषणं यथा स्यात्, अङ्गविशेषणं मा भूत् इति। लुलुवतुः, लुलुवुः [4]इत्येतत् तु 'ओः सुपि' (६. ४. ८३/२८१) इति नियमादपि[5] सिध्यति। अनेकाचः[6] इति किम्? नियौ। नियः। असंयोगपूर्वस्य इति किम्? यवक्रियौ। यवक्रियः। धातुना संयोगविशेषणं किम्? इहापि स्यात उन्न्यौ, उन्न्यः इति। गतिकारकाभ्यामन्यपूर्वस्य नेष्यते (म. भा. ३. २१०), परमनियौ, परमनियः इति॥

## ओः सुपि। (८३/२८१)

धात्ववयवः संयोगः पूर्वो यस्मादुवर्णान्न [7]भवति, तदन्तस्याङ्गस्य अनेकाचः अजादौ सुपि[8] परतो यणादेशो भवति। खलप्वौ। खलप्वः। [9]शतस्वौ। शतस्वः। सकृल्ल्वौ। सकृल्ल्वः। सुपि इति किम्? लुलुवतुः। लुलुवुः। अनेकाचः इत्येव, लुवौ। लुवः। असंयोगपूर्वस्य इत्येव, कटप्रुवौ। कटप्रुवः। गतिकारकाभ्यामन्यपूर्वस्य नेष्यते, परमलुवौ। परमलुवः॥

## वर्षाभ्वश्च। (८४/२८२)

वर्षाभू इत्येतस्याजादौ सुपि परतो यणादेशो भवति। वर्षाभ्वौ। वर्षाभ्वः।

[७८६] पुनर्भ्वश्चेति वक्तव्यम्। (म.भा.३. २१०)

पुनर्भ्वौ। पुनर्भ्वः। कारापूर्वस्यापीष्यते। काराभ्वौ। काराभ्वः (म. भा. ३. २१०)॥

## न भूसुधियोः। (८५/२७३)

[10]भू सुधी इत्येतयोर्यणादेशो न भवति[11]। प्रतिभुवौ। प्रतिभुवः। सुधियौ। सुधियः॥

## छन्दस्युभयथा। (८६/३५४८)

छन्दसि विषये भू सुधी इत्येतयोः उभयथा दृश्यते। 'वनेषु चित्रं विभ्वं विशे' (ऋ. ४. ७. १)। 'विभुवं विशे' (तै. सं. १. ५. ५)। सुध्यो हव्यमग्ने। सुधियो हव्यमग्ने॥

---

1. अन्तरङ्गत्वात् इको यणचि इति सिद्धे समानाश्रये वार्णादाङ्गं बलीयः इति ज्ञापकार्थं वचनम् इत्यधिकम् ड. 2. भवति नास्ति ब. फ. इ. 3. अङ्गस्य नास्ति क. 4. इत्येव तु क. 5. अपि नास्ति फ. 6. ग्रहणम् इत्यधिकम् ह. 7. भवति नास्ति फ. ह. 8. प्रत्यये इत्यधिकम् फ. ह. 9. शकह्वौ शकह्वः फ. ह. 10. भू- ग्रहणेन तदन्तस्यापि ग्रहणम् इत्यधिकम् फ. ह. 11. अचि सुपि इत्यधिकम् ब.